# Hayagriva Mantravivaranam from Parashara Samhita

# પરાશરસંહિતાયાં હયગ્રીવમન્ત્રવિવરણમ્

## Document Information

Text title : Hayagriva Mantravivaranam from Parashara Samhita

File name : hayagrIvamantravivaraNam.itx

Category : vishhnu, mantra

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Description/comments : parAsharasaMhitAyAM

Latest update : September 19, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 20, 2023

*sanskritdocuments.org*

Hayagriva Mantravivaranam from Parashara Samhita

# પરાશરસંહિતાયાં હયગ્રીવમન્ત્રવિવરણમ્

શ્રીહયગ્રીવૈકાક્ષરી ।

અથોચ્યન્તે વિશેષેણ ક્રમાદ્દ્વાદશસઙ્ખ્યયા ।
હયગ્રીવમહામન્ત્રા વિદ્યામોક્ષપ્રદાયકાઃ ॥

સાન્તં હાન્તં સમુદ્ધૃત્ય પ્રણવાન્તં સબિન્દુકમ્ ।
એકાક્ષરં હયગ્રીવમેતત્ જ્ઞાનાદિદાયકમ્ ॥

ષટ્સ્વરૈસ્તુકરન્યાસં કુર્યાત્ દેવ ષડઙ્ગકમ્ ।
વ્યાપ્યં તદ્વ્યાપકં ચૈવ તન્મન્ત્રેણૈવ કારયેત્ ॥

એકાક્ષરહયગ્રીવં દૃષ્ટ્વા પૂર્વોક્તમાદરાત્ ।
પૌરશ્ચરણહૂમાદિ કુર્યાત્તન્મન્ત્રસિદ્ધયે ॥

શ્રીહયગ્રીવત્રયક્ષરી ।

ક્રમાદ્વક્ષ્યે વિધાનેન હયગ્રીવત્રયાક્ષરમ્ ।
"મહામાયાં હ્સૌં હ્રીં" ચ ભવેદેતત્ત્રયાક્ષરમ્ ।
જ્ઞાનૈશ્વર્યકરં શાન્તં સર્વેષાં મુક્તિદાયકમ્ ॥

કરન્યાસં ષડઙ્ગં તુ કુર્યાન્મન્ત્રાક્ષરત્રયૈઃ ।
હયગ્રીવમહં વન્દે ચક્રપદ્મધરં વિભુમ્ ॥

શ્રીભૂમિસહિતં દેવં સર્વાભરણભૂષિતમ્ ।
લક્ષમેકં જપેદ્ભક્ત્યા એતન્મન્ત્રાદિસિદ્ધયે ॥

શ્રીહયગ્રીવષડક્ષરમ્ ।

હોમપૂજાદિકં સર્વમેકાક્ષરવદાચરેત્,
વક્ષ્યે તદ્વત્ક્રમેણૈવ હયગ્રીવષડક્ષરમ્ ॥

"ૐ-હં-સાં-હું-ફટ્સ્વાહેતિ" ઉદ્ધરેન્મન્ત્રમુત્તમં
જ્ઞાનમોક્ષપ્રદં નૃણાં સર્વદિગ્વિજયપ્રદમ્ ॥

પ્રણવેન કરન્યાસં ષડઙ્ગં ષટ્સ્વરૈન્યસેત્,
ચક્રશઙ્ખગદાપદ્મજ્ઞાનપુસ્તક ધારિણમ્ ॥

હયગ્રીવમહં વન્દે કિરીટાદિવિભૂષિતમ્ ॥

પૌરશ્ચરણહોમાદી નેવં ક્રમાદીનેકાક્ષરવદાચરેત્ ।

શ્રીહયગ્રીવાષ્ટાક્ષરી ।

અષ્ટાક્ષરં હયગ્રીવં ક્રમાદ્વક્ષ્યે ચતુર્મુખમ્ ।
“ૐ હયગ્રીવાય નમ”ઇતિ ઇદમષ્ટાક્ષરં ભવેત્ ॥

હયગ્રીવમિદં શાન્તં મોક્ષશ્રીજ્ઞાનદાયકમ્!
પ્રણવેન કરન્યાસં ષડઙ્ગં ષટ્સ્વરૈઃ ન્યસેત્ ॥

શઙ્ખચક્રગદાપદ્મજ્ઞાનપુસ્તકધારિણમ્ ।
પાશાઙ્કુશધરં દેવં હયગ્રીવમહં ભજે ॥

શ્રીહયગ્રીવદશાક્ષરી

પૂજનાર્ચાદિકં સર્વં તદેકાક્ષરવદ્ભવેત્ ।
દશાક્ષરં હયગ્રીવં વક્ષ્યે તદ્વત્ક્રમેણ ચ ॥

“ૐ હ્રીં ક્ષ્લૌં હયગ્રીવાય સ્વાહા” ઇતિ મન્ત્રં સમુદ્ધરેત્ ॥

દશાક્ષર હયગ્રીવમેતદ્વિદ્યાપ્રદાયકમ્ ।
પ્રણવેન કરન્યાસં ષડઙ્ગં ષટ્સ્વરૈન્યસેત્ ॥

ચક્રશઙ્ખગદાપદ્મ પાશશાર્ઙ્ગાસિ ધારિણમ્ ।
જ્ઞાનાદિપુસ્તકધરં હયાનનમહં ભજે ॥

પૌરશ્ચરણહોમાદીનેકાક્ષરવદાચરેત્ ।

શ્રીહયગ્રીવ દ્વાદશાક્ષરી ।

હયગ્રીવાખ્યમમલં વક્ષ્યે તદ્દ્વાદશાક્ષરમ્ ।
“ૐ નમો ભગવતે હયગ્રીવાય”મનુર્ભવેત્ ।
હયગ્રીવમનું શાન્તં વિદ્યૈશ્વર્યાદિદાયકમ્ ।
પ્રણવેન કરન્યાસં ષટ્સ્વરૈસ્તુ ષડઙ્ગકમ્ ॥

પૂજાહોમાદિકં સર્વમેકાક્ષર વદાચરેત્ ।
શઙ્ખચક્રગદાપદ્મજ્ઞાનપુસ્તક ધારિણમ્ ।
પાશાઙ્કુશાગ્નિ વજ્રાદિખેટકુન્તધરં વિભુમ્ ॥

શ્રીભૂનીળાધિપં દેવં વનમાલાવિરાજિતમ્ ।
હયગ્રીવં ભજે નિત્યં સર્વાભરણભૂષિતમ્ ॥

શ્રીહયગ્રીવાનુષ્ટુપ્ ।
વક્ષ્યે ચાનુષ્ટુભં શાન્તં હયગ્રીવમનુત્તમમ્ ॥

ભુક્તિમુક્તિપ્રદં સમ્યક્ સર્વવિદ્યાપ્રદાયકમ્ ॥

ઋગ્યજુસ્સામરૂપાય વેદાહરણકર્મણે ।
પ્રણવોદ્ગીથવપુષે મહાશ્વશિરસે નમઃ ॥

ઉદ્ગીથ પ્રણવોદ્ગીથ સર્વવાગીશ્વરેશ્વર ।
સર્વવેદમયાચિન્ત્ય સર્વં બોધય બોધય ॥

પદૈ ર્થૈઃ કરન્યાસં કુર્યાદ્દ્વિ ષડક્ઙ્ગકમ્ ।
આનુષ્ટુભદ્વયં ચૈવ જ્ઞાનાદ્યૈશ્ચ તથા ભવેત્ ॥

ધ્યાનાર્ચનાદિકં સર્વમેકાક્ષરવદાચરેત્ ॥

ૐ હ્લૌં હ્રીં શ્રીમ્-ઐમ્-શ્રીહયગ્રીવ મમ સર્વવિદ્યાં દાપય દાપય ।
તામસબુદ્ધિં હન હન ॥ અજ્ઞાનાદીન્ નાશય નાશય ॥

સર્વ વેદશાસ્ત્રાદિષુ સર્વજ્ઞત્વં દાપય દાપય ।
અણિમાદીન્ દદ ફટ્ સ્વાહા ॥ ૯॥

એતન્મન્ત્રાર્થ સિદ્ધ્યર્થં જપેદયુતમાદરાત્ ॥

ૐ હ્રીં હયગ્રીવાય યં રં પરવાદિવિદ્યા પરવાદિજિહ્વાસ્તમ્ભં
કુરુ કુરુ હું ફટ્ સ્વાહા ॥ ૧૦॥

જપેદયુતમેતદ્વૈ તન્મન્ત્રફલસિદ્ધયે ॥

ૐ હ્રીં ષ્ટ્રાં હયગ્રીવાય પરવાદિસર્વવેદશાસ્ત્રસર્વવિદ્યામાકર્ષ
યાકર્ષય હ્લૌં ક્ષૌં વૌ ષટ્ ॥ ૧૧॥

ૐ ષ્ટ્રાં શ્રીં ક્ષાં હયગ્રીવનારસિંહાય યં રં સર્વશત્રૂન્
સ્તમ્ભય સ્તમ્ભય ભ્રામય ભ્રામય હું ફટ્ ॥ ૧૨॥

એતન્મન્ત્રાર્થસિદ્ધ્યર્થં જપેદયુતમાદરાત્ ॥

ઇતિ શ્રીપાઞ્ચરાત્રે પરાશરસંહિતાયાં વિશિષ્ટપરમધર્મશાસ્ત્રે
હયગ્રીવમન્ત્રાણાં ઋષ્યાદિધ્યાનવર્ણનં નામ અષ્ટાવિંશોધ્યાયઃ સમ્પૂર્ણઃ ।

Proofread by Chandrasekhar Karumuri

*Hayagriva Mantravivaranam from Parashara Samhita*

pdf was typeset on September 20, 2023

Please send corrections to *sanskrit@cheerful.com*